# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| **कक्षा- शास्त्री-३ (SEM-5)** | **प्रश्नपत्र-७** | **गुणा: - ७०** |
| **विषय:- साहित्यम्** | **CE-359** | **समय: - ११ त: ०२** |
| **दिनाङ्क: - ०१/१२/२०१६** | **सन्दर्भग्रन्थ: - काव्यमीमांसा** | |

**॥ प्रथमान्विति: ॥**

**प्र-१ द्वयो: ससन्दर्भं व्याख्या कार्या । ०८**

१. सोऽपि भगवान् स्वयम्भूरिच्छाजन्मभ्य: स्वान्तेवासिभ्य: । तेषु सारस्वतेयो वृन्दीयसामपि वन्द्य: काव्युपुरुष आसीत् ।

२. शास्त्रपूर्वकत्वात् काव्यानां पूर्वं शास्त्रेष्वभिनिविशेत । न ह्यप्रवर्तितप्रदीयास्ते तत्त्वार्थसार्थमध्यक्षयन्ति ।

३. भवति प्रथयन्नर्थं लीनं समभिप्लुतं स्फुटीकुर्वन् । अल्पमनल्पं रचयन्ननल्पमल्पं च सास्त्रकवि: ।

**प्र-२ काव्यमीमांसारचयितु: परिचयं लिखत । ०८**

**अथवा**

**प्रथमाध्यायस्य सारं लिखत ।**

**प्र-३ द्वयो: टिप्पणी लेख्या । ०४**

१. काव्यविद्योपदेशपरम्परा ।

२. अपौरुषेयं श्रुति: ।

३. पुराणम् ।

४. सूत्रलक्षणम् ।

**प्र-४ पञ्चानाम् एकवाक्येन उत्तराणि लिखत । ०५**

१. काव्यमीमांसाया: रचयिता क:?

२. श्रीकण्ठ: केभ्य: काव्यविद्यामुपदिदेश?

३. भरत: किमधिकरणं समाम्नासीत्?

४. वाङ्मयं कतिविधं किञ्च तत्?

५. राजशेखरस्य मते सप्तमं वेदाङ्गं किं भवति?

६. का नाम छन्दोविचित:?

७. कौटिल्यस्य मते चतस्र: विद्या: का: सन्ति?

**॥ द्वितीयान्विति: ॥**

**प्र-५ द्वयो: ससन्दर्भं व्याख्या कार्या । ०८**

१. यस्य निसर्गत: शास्त्रमनुधावति बुद्धि: स बुद्धिमान् । यस्य च शास्त्राभ्यास: संस्कुरुते बुद्धिमसावाहार्यबुद्धि: ।

२. प्रथयति पुर: प्रज्ञाज्योतिर्यथार्थपरिग्रहे तदनु जनयत्यूहापोह क्रिया विशदं मन: । अभिनिविशते तस्मात्तत्त्वं तदेकमुखोदयं सह परिचयो विद्यावृद्धै: क्रमादमृतायते ॥

३. जन्मान्तरसंस्कारापेक्षिणी सहजा । जन्मसंस्कारयोनिराहार्या । मन्त्रतन्त्राद्युपदेशप्रभवा औपदेशिकी ।

**प्र-६ चतुर्थाध्यायस्य प्रतिपाद्यविषयान् निरूपयत । ०८**

**अथवा**

**भावयित्रीप्रतिभायाः निरूपणं क्रियताम् ।**

**प्र-७ एकस्योपरि टिप्पणी लेख्या । ०२**

१. बुद्धिः

२. समाधिः

**प्र-८ द्वयोः लघूत्तराणि लिखत । ०२**

१. का बुद्धिविकासकामधेनुः?

२. को नाम अभ्यासः?

३. प्रतिभायाः के प्रकाराः सन्ति?

४. को नाम सारस्वतकविः?

**॥ तृतीयान्वितिः ॥**

**प्र-९ द्वयोः ससन्दर्भं व्याख्या कार्या । ०८**

१. प्रसरति किमपि कथञ्चन नाभ्यस्ते गोचरे वचः कस्य । इदमेव तत्कवित्वं यद्वाचः सर्वतो दिक्काः ॥

२. प्रतिभाव्युत्पत्ती मिथः समवेते श्रेयस्यौ इति यायावरीयः न खलु लावण्यलाभादृते रूपसम्पदृते रूपसम्पदो वा लावण्यलब्धिर्महते सौन्दर्याय ।

३. आवापोद्धरणे तावद्यावद्दोलायते मनः । पदानां स्थापिते स्थैर्ये हन्त सिद्धा सरस्वती ॥

**प्र-१० काव्यमीमांसायाः पञ्चमाध्यायस्य प्रतिपाद्यविषयान् निरूपयत । ०८**

**अथवा**

**कवेः अवस्थाः प्रतिपादयत ।**

**प्र-११ द्वयोः टिप्पणी विधेया । ०४**

१. काव्यकविः ।

२. नामकविः ।

३. शास्त्रार्थकविः ।

४. शब्दपाकः ।

**प्र-१२ पञ्चप्रश्नाः एकवाक्येन समाधेयाः । ०५**

१. यायावरीयस्य मते का व्युत्पत्तिः?

२. शास्त्रकविः काव्ये किं विच्छिनत्ति?

३. कवेः अशक्तिः कथं संव्रियते?

४. हतत्विषोऽन्धाः शिथिलांसबाहवः – इति पद्ये किम्प्रकारकः कविः?

५. अलङ्कारकवेः द्वौ प्रकारौ कौ?

६. कः हृदयकविः भवति?

७. काव्ये पाकः कतिविधः भवति?